**ARYAVART SHODH VIKAS PATRIKA**
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218 **PP. No.- 195-197**
I S S N NO. - 2347 – 2944 (Print)
e–I S S N NO.- 2582 – 2454 (Online)
Vol.-19, No.-II, Issues-36, YEAR-April-June. 2025

# गुणसूत्रविमर्शः

**डॉ0 रविशंकर पाण्डेयः**
सहाकाचार्यः, संस्कृतविद्याविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी (उ0प्र0) भारत

**Received-22.05.2025, Revised-29.05.2025, Accepted-06.06.2025 E-mail : aaryvart2013@gmail.com**

***सारांशः*** *सारांशः भगवता भाष्यकारेण 'अथ शब्दानुशासनम्' इति वार्तिकं भाष्यादौ अलेखि। तत्र प्रदीपोद्द्योतकारौ शब्दानुशासनं नाम व्याकरणशास्त्रमिति प्रोक्तवन्तौ। तत्त्वं तनुते यत् व्याकरणं लौकिकानां वैदिकानाञ्च शब्दानाम् अनुशासनं करोति। शब्दानाम् अनुशासनार्थं सूत्रात्मिकाष्टाध्यायी पाणिनिना व्यरचि।*

*कुंजीभूत शब्द– गुणसूत्रविमर्शः, भगवता भाष्यकारेण, शब्दानुशासनम, याकरणशास्त्रमिति, लौकिकानां, वैदिकानाञ्च*

तच्च सूत्रं षड्विधम्–

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकाराश्च षड्विधं सूत्रलक्षणम्।।
षड्विधत्वं सूत्रं विभज्य सूत्रस्य लक्षणमः
अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।

प्रस्तुतकारिकया स्पष्टं भवति यत् सूत्रम् अल्पाक्षरं भवति। अल्पाक्षरत्वात् विशद्विषयाणां स्फुटने काठियमनुभूय सूत्रातिरिक्तसिद्धान्तोद्भावनाय गणपाठस्य संरचना भगवता पाणिनिना कृता। सन्दर्भेऽस्मिन् काशिकाकारैरपि अगादि–

वृत्तौ भाष्ये तथा धातुनामपरायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः।।
इष्ट्युपसंख्यानवती शुद्धगणा विवृतगुणसूत्रार्था।
व्युत्पन्नरूपसिद्धिर्वृत्तिरीयं काशिका नाम।।

हरदत्तमिश्रेण काशिकायाः पदमञ्जरीटीकायाम् मंगलस्थ– 'धातुनाम– पारायणादिषु' इति प्रतीकमादाय धातुपदेन धातुगणः, नामपदेनप्रातिपदिकगणः इति व्यवहारो विहितः। तथा च द्वितीयमंगलवाक्ये शुद्धगणा इत्यंशम् अवाप्य गणस्य शुद्धिरिति व्याख्या कृता। एतेन तत्त्वं समायाति यत् व्याकरणशास्त्रे गणपाठस्यापि स्वतन्त्रसत्ता विद्यते।

एतेषां गणपाठानां सन्निवेशः अष्टाध्याय्यां प्रत्यध्यायं समुपलभ्यते। वैयाकरण– सिद्धान्तकौमुद्याः ग्रन्थस्य भूमिकायां श्रीगोविन्दाचार्यः प्रत्यध्यायं गणसूत्राणां संख्यायाः संकलनमकरोत् तत् अत्र प्रदर्श्यते–गणपाठान्तर्गत 'अष्टाध्यायाः षट्पञ्चाशत् उत्तरद्विशतसूत्राणि सन्ति। तत्र प्रथमाध्याये षट्, द्वितीयाध्याये चतुर्विंशतिः, तृतीयाध्याये त्रयोदश, चतुर्थाध्याये शतम्, पञ्चमाध्याये षष्टिः, षष्ठाध्याये पञ्चत्रिंशत्, सप्तमाध्याये सप्त अष्टामाध्याये चैकादशसूत्राणि सन्निविष्टानि एवं समग्रे त्रिमुनिव्याकरणे गणपाठस्य कियती संख्येति निर्णीता विद्यते। केचन शब्दशास्त्रिणः त्रिमुनिव्याकरणं पञ्चाङ्गमिति प्रवदन्ति। तानि चाङ्गानि वर्तन्ते–धातुपाठः, गणपाठः, लिङ्गानुशासनम्, शिक्षा, वार्तिकपाठश्चेति। अत्र गणपाठस्य व्याकरणाङ्गभूतत्वेन विशेषविचाराय प्रस्तुतनिबन्धः मया स्वीकृतः। अत्र क्रमेण यथामति यथाशक्ति च गणसूत्राणां क्रमेण व्याख्या प्रदर्श्यते। अष्टाध्याय्याः प्रथमाध्याये प्रथमं गणसूत्रं विद्यते 'सर्वादीनि सर्वनामानि' निबन्धे•स्मिन् पूर्वमेवं मयोक्तं यद् सूत्राणाम् अल्पाक्षरत्वात् गणपाठस्य पृथक्व्यवस्था, अत्र सूत्रे 'सर्वादीनि' इति पदेन पञ्चत्रिंशतशब्दानां ग्रहणं सञ्जायते। वस्तुतः सूत्रे 'सर्व' एकमेवपदं समुच्चार्य बोधस्तु पञ्चत्रिंशत– शब्दानामित्येवास्ति गणपाठस्य प्रयोजनम्। सर्वादीनि सर्वनामानि इति सूत्रे सर्व इति शब्दस्य सर्वनामता सम्भवति न वेति जिज्ञासायां शास्त्रकारैः अनेके मार्गाः अनुसन्धिताः सन्ति। तेषु अनुसन्धितेषु मार्गेषु सर्वादीनि इत्यत्र तद्गुणसंविज्ञानबहुब्रीहिः समासः इति विषयं शास्त्ररीत्या विविच्य सर्वशब्दस्यापि सर्वनामता इति वदन्ति शास्त्रशब्दविदः।

तत्र वस्तुतः अनेके वैयाकरणाः 'अदः सर्वेषाम्' , हलि सर्वेषां प्रभृतिषु सूत्रेषु सर्वेषामित्यत्र सुट् इति प्रत्ययविधानत्वात् सिद्धान्तयन्ति यत् सर्वशब्दस्यापि सर्वनामसंज्ञा विश्व–शब्द इव भवतीति। तदर्थं तद्गुणसंविज्ञानेत्यादीनां परिकल्पनायाः आवश्यकता नास्त्येव।

समग्रे व्याकरणशास्त्रे गणसूत्रविषये मतद्वयं प्रसिद्धमस्ति, एकं मतम् यत् अनेकानि गणसूत्राणि सामान्यभूतानि, अनेकानि आकृतिगणानि इति। आकृतिगणस्य परिकल्पना प्रयोगान् दृष्ट्वा कृता विद्यते। वैयाकरणसिद्धान्तकौमुद्यां गणपाठे 'साक्षात्प्रभृतीति' इति सूत्रस्य समुल्लेखप्रसङ्गे 'आकृतिगणोऽयम्' इति प्रोक्तवान् भट्टोजी दीक्षितः। किन्तु अस्य सूत्रस्यार्थोदाहरणविवेचना समासप्रकरणे कृता विद्यते तत्र आकृतिगणत्वं मत्वा किम्प्युदाहारणं न दत्तं विद्यते। न च काशिकाग्रन्थे, नैव पदमञ्जरीन्यासबालमनोरमातत्त्वबोधिनीप्रभृतिषु टीकासु चास्योदाहरणं समुपलभ्यते। सर्वादीनिसर्वनामानि, स्वरादि निपातमव्ययम् , शस्प्रभृतयः प्राक्समासान्तेभ्यः इमानिप्रथमाध्याये पठितानि सूत्राणि आकृतिगणे नैव पठितानि सन्ति। तसिलादयस्तद्धिताः अस्मिन्नेवध्याये, तसिलादयस्तद्धिताः साक्षात्प्रभृतीनि च इमानि त्रिणि सूत्राणि आकृतिगणत्वेन स्वीकृतानि वर्तन्ते सिद्धान्तकौमुद्याम्।

अष्टाध्यायाः द्वितीयाध्याये•पि गणसूत्राणि वर्तन्ते। अस्मिन्नेवाध्याये प्रमुखभूतानां केषाञ्चिद् गणसूत्राणां शास्त्रानुगतं विवेचनमत्रोपस्थापयामि। अत्र 'सप्तमीशौण्डैः' गणसूत्रमस्ति। अस्य सूत्रस्य पाठः समासप्रकरणे विद्यते। अस्य गणसूत्रस्य विशेषविवेचना महाभाष्येऽपि समुपलभ्यते। तत्र सप्तमीशौण्डैः इति सूत्रस्य योगविभागः कृतोऽस्ति। योगविभागं कृत्वा अर्थद्वयमस्य सूत्रस्य विधीयते। प्रथमोऽर्थः सप्तम्यन्तं समस्यते शौण्डादिगणपठितैः समर्थसुबन्तैः एवं कृत्वा अक्षशौण्डः अक्षधूर्तः, अक्षकितवः अक्षकुशलः प्रभृतीनि समासपदानि व्याख्यातानि वर्तन्ते। 'पुनश्च भाष्यकारः प्रोवाच यत् अस्य गणसूत्रस्य योगविभागः करणीयः। योगविभागे अक्षशब्दः येन केनचिद् समर्थेन सुबन्तेन सह समस्यते इत्यर्थः भगवता भाष्याकरेण कृतः। प्रस्तुतार्थं विधाय सिद्धशुष्कपक्ववन्धनैश्चेति सूत्रस्य आवश्यकता नास्तीति प्रोवाच । वस्तुतः अस्य सप्तमी शौण्डेरिति सूत्रस्य योगनिभागम् आकृतिगणञ्च मत्वा सप्तमीसमासविधानं प्रति वैयाकरणाः वदन्ति यत् भगवता भाष्यकारेण यदि योगविभागो विधीयते चेत् तर्हि अस्य सूत्रस्याकृतिगणे पाठस्य आवश्यकता नास्तीति। अस्मिन् अध्याये–''पात्रेसमितादयश्च, उपमितव्याघ्रादिभिः सामान्याप्रयोगे, श्रेण्यादयः कृतादिभिः शाकपार्थिवादीनां सिद्धये उत्तरपदलोपोसंख्यानम्,

मयूरव्यंसकादयश्च, वाहिताग्न्यादिषु पैपलादिम्यश्च'' इमानि सप्तसूत्राणि अस्मिन् अध्याये आकृतिगणत्वेन परिगणितानि वर्तन्ते। गणपाठे समागतं कुमारश्रमणादिभिः सूत्रं विशेषविवेचनीयमस्ति यतोहि गणसूत्रत्वात् तत्र प्रश्नः जागृतोभवति यत् अस्मिन् श्रमणादिगणे केचन पुँस्काः केचन शब्दाः स्त्रीलिंगाश्च पठिताः सन्ति। एवं सति कुमारशब्दः श्रमणादिभिः सह समस्यते, स च समासः तत्पुरुष इति 'तर्हि श्रमणशब्दः गणे पठितः स्त्रीलिंगबोधकशब्देन, पुँल्लिगबोधकशब्देन सह च समस्यते। गणेऽस्मिन् श्रमणा, प्रव्रजिता, कुटा, गर्भिणी, तापसी, दासी, बन्धकी इमे सप्तशब्दाः स्त्रीलिंगाः। अध्यापकः, अभिरुपकः, पण्डितः, पटुः, मृदुः, कुशलः, चपलः, निपुणः इमे अष्टौ शब्दाः पुल्लिंगाः पठिताः सन्ति।

गणपाठसूत्रास्यैतिहासिकं महत्वमपि प्रतीयते यतोहि–काशिकाकारेण कुमारश्रमणा इति पदमद्दात् तत्र प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति इति परिभाषाबलात् कुमारी चासौ श्रमणा इति विग्रहेऽपि 'कुमारश्रमणा' इति प्रयोगो भवति। कुमारी श्रमणा इति शब्दस्य साक्षात् सम्बन्धः बौद्धधर्मेणास्ति। तत्र बौद्धधर्मे बौद्धसन्यासिनीनां कृते श्रमणा शब्दः व्यवह्रयते। अर्थात् इदं गणं सूत्रं सुपष्टं संकेतयति यत् गौतमबुद्धस्य कालानान्तरमेव पाणिनेः कालः विद्यते।

गणसूत्रविचारप्रसङ्गे तृतीयाध्ये 'लोहितादिडाज्भ्यः क्यस्, कण्डवादिभ्यो यक्, भीमादयो ऽपादाने ' त्रिण्येव सूत्राणि आकृतिगणत्वेन पठितानि वर्तन्ते।' अत्र प्रसङ्गे लोहितादिसूत्रस्याकृतिगणे पाठत्वात् विशेषं फलमिति ग्रन्थकाराः प्रदर्शन्ति वस्तुतः सूत्रमिदं भवत्यर्थे क्यष् प्रत्ययस्य विधानं करोति किन्तु लोहितादिगणे पठिताः लोहित–चरित–नील–फेन–मद्र–हरित–दास–मन्द एभ्यः शब्देभ्यः क्यङ् क्यष् च इत्येतौ प्रत्ययौ भवतः अपठितेभ्यः शब्देभ्यः केवलं क्यष् एव प्रत्ययो भवति तस्माद् वर्मायते, निद्रायति, करुणायति' प्रभृतयः प्रयोगाः सिद्धयन्ति। सुखादिभ्यः कर्तृवेदनायाम् अस्मिन् गणसूत्रे एकादशशब्दाः पठिताः वर्तन्ते। ते यथा–सुखादिभ्यः कर्तृवेदनायाम् 3/1/18।। सुख, दुःख, तृप्त, कृच्छ्र, अस्र, आस्र, अलीक, प्रतीप, करुण, कृपण, सोढ। इत्येतानि सुखादीनि। एतेषां सर्वेषां शब्दानां प्रत्यक्षतः सम्बन्धः मनसा इन्द्रियेण सह विद्यते। तत्र आशंका समुत्थिता भवति यत् कस्य मनः? तर्हि कर्तुरति। सन्दर्भेऽस्मिन् न्यासकारः सम्यक् वदति–''सूत्रे कर्तृग्रहणसामर्थ्याद् विशिष्टो यः कर्ता सुखादीनामाश्रयः समवायिकारणम् स एव गृह्यते। तेनाश्रयाश्रयि– भावेन सम्बन्धेन कर्तृसम्बन्धिभ्यः सुखादिभ्यः प्रत्ययो विज्ञायते। न च प्रसाधकः सुखादीनां समवायिकारणं किं तर्हि निमित्तकारणम्। सुखादिसमवायिकारणस्य कर्तु ये सुखादयः आश्रयाश्रयिभावेन सम्बन्धिस्ते प्रत्यक्षेणोपलभ्यन्ते। तेन तदुपलब्धिः अनुभव– स्वभावा भवतीति युक्तमुक्त–वेदनायामर्थेऽनुभव इति। तर्हि लोके कर्तृग्रहणेन सुखादयो विशिष्यन्ते, न वेदना ततश्च कर्तृवेदनायामिति षष्टीसमासो न प्राप्नोति असामर्थ्यात्।'' एवं प्रकारेण सूत्रे•स्मिन् कर्तृग्रहणस्य वैशिष्ट्यं दर्शनविषयत्वेन प्रतिपादितं न्यासकारेण।

गणसूत्रे चतुर्थाध्यायेऽपि कानिचिद् सूत्राणि विशेषव्याख्यातानि सन्ति मूलग्रन्थेषु टीकाग्रन्थेषु च। अत्र 'अजाद्यष्टाप्' अश्वपत्पादितश्च शिवादिभ्योऽण्'। विशेषविवेचनीयं लोकदृष्ट्या अश्वपत्यादिभ्यश्च सूत्रमिदं यतोहि अस्मिन् गणसूत्रे समाजे विशेषप्रसिद्धाः शब्दाः वर्तन्ते यथा–शतपति–धनपति–राष्ट्रपति, गृहपति– धान्यपति–समापति– प्राणपति–क्षेत्रपति इति सूत्रमिदम् अण् प्रत्ययस्य विधानं करोति। एवंकृत्वा गाणपत–राष्ट्रपत–समापत–प्राणपत प्रभृतीनां शब्दानां निष्पतिः जायते। अजाघतष्टाप् गणसूत्रमिदं टाप्प्रत्ययविधायकमिति। सूत्रेऽस्मिन् बालमनोरमाकारः तत्वबोधिनीकारः न्यासकारः पदमञ्जरीकारश्चेते विद्वान्सः 'अतः' इत्यत्र तपकरणविषये विचारं संस्थाप्य सिद्धान्तरूपेण प्रोचुः, अकारान्तेभ्यः शब्देभ्यः इति। पुनश्च गणे•स्मिन् पठ्यमानाः अज–एडक–चटक–मूषिक–प्रभृतयः शब्दाः, तेभ्यः शब्देभ्यः जातिवाचकत्वेन जातेरस्यीविषयादयोपधात् इति सूत्रेण प्राप्तडीष् प्रत्ययं, तं प्रत्ययं प्रबाध्य टाप् क्रियते इति इयमपि चर्चा टीकाग्रन्थेषु समुपलभ्यते। पुनश्च अस्मिनेव गणे पठिताः बालः–होड–पाक–वत्स इति शब्दाः सन्ति तत्र वयसि प्रथमे इति सूत्रात् डीप् प्रत्ययस्य प्राप्तिः किन्तु गणपाठत्वात् टाप् प्रत्यय एव भवतीति। अस्मिन् अध्याये गणसूत्राणां महती संख्या विद्यते अन्य गणपाठाध्यायापेक्षयेति।

अष्टाध्याय्याः पञ्चमोऽध्यायेऽपि अनेकानि गणसूत्राणि पठितानि विद्यन्ते तेषां केषाञ्चिद् सूत्राणां विमर्शः प्रसंगानुगुणम् अत्र प्रदर्श्यते। वस्तुतः गणपाठनुगुणम् अस्याध्यायस्य समारम्भः उगवादिभ्यो: यत् इति इत्यतः उरः प्रभृतिभ्यः कप् इति सूत्रपर्यन्तं कृतमस्ति। गुणसूत्रदृष्ट्या अयमप्यध्यायः विशेषसमृद्धोऽस्ति। प्रथमं गणसूत्रम् अस्मिन् अध्याये उगवादिभ्यो यत् इत्यस्यार्थः–''उवर्णान्तात् गवादिभ्यश्च यत् स्यात्'' इत्यर्थो सम्पादितः भट्टोजी दीक्षितेन। अस्मिन्नेववाध्याये 'रसादिभ्यश्च' गणसूत्रं पठितमस्ति।गणसूत्रेऽस्मिन् रस–रूप–वर्ण–गन्ध–स्पर्श–शब्द–स्नेह प्रभृतयः गुणवाचकाः शब्दाः पठितास्सन्ति। सूत्रमिदं तद्धितप्रकरणे पठितमस्ति। तत्र भट्टोजी दीक्षितः प्रोवाच गुणग्रहणं रसादीनां विशेषणमिति'। वस्तुतः सूत्रमिदं मतुप्प्रत्ययविधायकमिति। उदाहरणानि–रूपमस्य अस्मिन् वा अस्ति सः रूपवान् इति, गन्धः–अस्यास्ति इति गन्धवान् एवं स्नेहवान्, शब्दवान्, रूपवान् इत्यादीनि च। सूत्रे बालमनोरमाकारः विचारमकरोत् यत् रूपशब्दः यदि गुणवाची तदेव मतुप् प्रत्ययो भवति अन्यथा अत इति ठनौ तदा रूपिणी इति रूपस्य शब्दस्वरूपं निष्पद्यते।

गणपाठस्य षष्ठेऽध्याये समारम्भे शकन्ध्वादिषु पररूपं वाच्यं इति सूत्रं पठितमस्ति। शकन्ध्वादिषु पररूपं वाच्यम् (वा0) 6/1/94।। शकन्धुः, कर्कन्धुः, कुलटा। सीमन्तः केशवेशे। हलीषा, मनीषा, लाङ्गलीषा, पतञ्जलिः। सारङ्गः पशुपक्षिणोः। इति शकन्ध्वादिः।। तत्र शब्दाः सन्ति–वस्तुतः इदं सूत्रं लघुसिद्धान्तकौमुद्याः सन्धिप्रकरणे समायाति। ततः एवः छात्राः गुरुभिः गणसूत्रस्य किं तात्पर्यम् इति अवगच्छन्ति। शकन्धुः कर्कन्धुः इति देशवाचकौ इमौ शब्दौ स्तः शकदेशस्य अन्धुः कर्कदेशस्य अन्धुः इति समासविग्रहः। समासविग्रहे कृते सति–सन्धेः चर्चा विद्यते। शक–अन्धुः–कर्क–अन्धुः इति दशायाम् इति दशायाम्–अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घस्य प्राप्तिः किन्तु पररूपत्वात् शकन्धुः, कर्कन्धुः, इति रूपस्य सिद्धिर्भवति। अस्मिन् अध्याये प्रथमं सूत्रं शकन्ध्वादिषु पररूपं वाच्यम् अन्तितम् तु बिल्कादिभ्यश्छस्य लुक् इति।

सप्तमेऽध्याये स्नात्व्यादयश्च इत्यारभ्य कणादिचेति वक्तव्यंपर्यन्तं सप्तसूत्राणि व्याख्यातानि गणसूत्रत्वेनेति। अस्मिन् अध्याये आकृतिगणत्वेन 'अनुशतिकादीनां च' सूत्र पठितमस्ति। प्रस्तुताकृतिगण 'सूत्रमाश्रित्य अनुशतिकादीनां च 7/3/20।। अनुशतिक, अनुहोड, अनुसंवरण (अनुसंचरण) अनुसंवत्सर, अङ्गारवेणु, असिहत्य, अस्यहत्य, अस्यहेति, वध्योग, पुष्करसद्, अनुहरत्, कुरुकत, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्वलोक, सर्वपुरुष, सर्वभूमि, प्रयोग, परस्त्री। राजपुरुषात्ष्यञि। सूत्रनड। इत्यनुशतिकादिराकृतिगणो•यम्। प्रभृतयः शब्दाः संग्रहीताः वर्तन्ते। अष्टमेऽध्याये तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्यायोः इत्यतः क्षुम्नादिषु च पर्यन्त गणसूत्रस्य पाठः पाणिनिना कृतः। अस्मिन् अध्याये कस्कादिषु च सूत्रमिदं वैयाकरणसिद्धान्तकौमुद्यां सन्धिप्रकरणे विचारितमस्ति। सूत्रमिदं विसर्गस्य सत्वं करोति। इदमपि सूत्रम् आकृतिगणत्वेन पठितमस्ति।

पाणिनिव्याकरणे गणपाठस्य शब्दसाधुत्वाय स्वतन्त्रं प्रकरणं समुपलभ्यते। तत्र गणसूत्राणि पठितानि तथा च गणसूत्रे समागताः शब्दाः अपि प्रदत्ताः वर्तन्ते। अनया प्रकियया वैयाकरणानां प्रमुखः 'अल्पमात्रा लाघवेन पुत्रोत्सवं मन्यन्ते'' इति सिद्धान्तः सम्पुष्टो भवति। यद्यपि गणपाठे

ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
I S S N NO. - 2347 – 2944 (Print)
e–I S S N NO.- 2582 – 2454 (Online)
Vol.-19, No.-II, Issues-36, YEAR-April-June. 2025

भ्वादीनाम्–अदादीनाम् वैयाकरणाः गणनां कुर्वन्ति किन्त्वत्र वैयाकरणसिद्धान्तकौमुद्याः अन्ते विद्यमाने गणसूत्रे प्रदत्तव्यवस्थानुगुणं निबन्धेऽस्मिन् विचारः समुपास्थापितः मया।

इति शम्

**संदर्भ ग्रंथ सूची**

1. वैयाकरणसिद्धान्तकौमुद्याः भूमिकायाम्?
2. वैयाकरणसिद्धान्तकौमुद्याः भूमिकायाम्?
3. काशिकप्रथमखण्डे–मंगलाचरणम्।
4. काशिकप्रथमखण्डे–मंगलाचरणम्।
5. वैयाकरणसिद्धान्तकौमुदीभूमिकायाम्।
6. अष्टाध्यायी–1/1/27।
7. अष्टाध्यायी–
8. अष्टाध्यायी– 1–4–74।
9. वैयाकरणसिद्धान्तकौमुदी, पृ0 665।
10. अष्टाध्यायी 1–1–37।
11. अष्टाध्यायी 5–4–43।
12. वैयाकरणसिद्धान्तकौमुदी–पृ0 665।
13. तत्रैव।
14. तत्रैव।
15. तत्रैव।
16. महाभाष्ये।
17. परिशिष्टे गणपाठः।
18. काशिकावृत्तौ 2–1–70।
19. परिभाषेन्दुशेखरः।
20. पाणिनिकालीनभारतवर्ष।
21. परिशिष्टे गणपाठः।
22. काशिकावृतौ।
23. अष्टाध्यायी–3–1–19।
24. न्यास काशिकावृतौ।
25. गणपाठे।
26. अष्टाध्यायी–4–1–63।
27. अष्टाध्यायी–4–1–20।
28. अष्टाध्यायी–
29. अष्टाध्यायी–5–4–15।
30. वैयाकरणसिद्धान्तकौमुदी
31. अष्टाध्यायी–5–2–115।
32. अष्टाध्यायी–6–1–101।
33. अष्टाध्यायी–7–1–49।
34. अष्टाध्यायी–8–1–27।
35. अष्टाध्यायी–8–4–93।
36. अष्टाध्यायी–8–3–48।
37. परिभाषेन्दुशेखरे।

*****